श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये द्वात्रिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये द्वात्रिंशं दशकम् ॥

## मत्स्यावतारवर्णनम्

पुरा हयग्रीवमहासुरेण
षष्ठान्तरान्तोद्यदकाण्डकल्पे।
निद्रोन्मुखब्रह्ममुखाद्धृतेषु
वेदेष्वधित्सः किल मत्स्यरूपम् ॥ **32.1** ॥

सत्यव्रतस्य द्रमिलाधिभर्तु -
र्नदीजले तर्पयतस्तदानीम्।
कराञ्जलौ सञ्ज्वलिताकृतिस्त्व -
मदृश्यथाः कश्चन बालमीनः ॥ **32.2** ॥

क्षिप्तं जले त्वां चकितं विलोक्य
निन्येऽम्बुपात्रेण मुनिः स्वगेहम्।
स्वल्पैरहोभिः कलशीं च कूपं
वापीं सरश्चानशिषे विभो त्वम् ॥ **32.3** ॥

योगप्रभावाद्भवदाज्ञयैव
नीतस्ततस्त्वं मुनिना पयोधिम्।
पृष्टोऽमुना कल्पदिदृक्षुमेनं
सप्ताहमास्वेति वदन्नयासीः ॥ **32.4** ॥

प्राप्ते त्वदुक्तेऽहनि वारिधारा -
परिप्लुते भूमितले मुनीन्द्रः।

सप्तर्षिभिः सार्धमपारवारि -
ण्युद्घूर्णमानः शरणं ययौ त्वाम् ॥ **32.5** ॥

धरां त्वदादेशकरीमवाप्तां
नौरूपिणीमारुरुहुस्तदा ते।
तत्कम्पकम्प्रेषु च तेषु भूय -
स्त्वमम्बुधेराविरभूर्महीयान् ॥ **32.6** ॥

झषाकृतिं योजनलक्षदीर्घां
दधानमुच्चैस्तरतेजसं त्वाम्।
निरीक्ष्य तुष्टा मुनयस्त्वदुक्त्या
त्वत्तुङ्गशृङ्गे तरणिं बबन्धुः ॥ **32.7** ॥

आकृष्टनौको मुनिमण्डलाय
प्रदर्शयन् विश्वजगद्विभागान्।
संस्तूयमानो नृवरेण तेन
ज्ञानं परं चोपदिशन्नचारीः ॥ **32.8** ॥

कल्पावधौ सप्तमुनीन् पुरोवत्
प्रस्थाप्य सत्यव्रतभूमिपं तम्।
वैवस्वताख्यं मनुमादधानः
क्रोधाद्धयग्रीवमभिद्रुतोऽभूः ॥ **32.9** ॥

स्वतुङ्गशृङ्गक्षतवक्षसं तं
निपात्य दैत्यं निगमान् गृहीत्वा।
विरिञ्चये प्रीतहृदे ददानः
प्रभञ्जनागारपते प्रपायाः ॥ **32.10** ॥

॥ इति श्रीमन्नारायणीये द्वात्रिंशं दशकं समाप्तम् ॥